श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये उत्तरकाण्डे

# ॥ सप्तदशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ सप्तदशः सर्गः ॥

## रावणेन तिरस्कृताया ब्रह्मर्षिकन्याया वेदवत्यास्तस्मै शापं दत्त्वाग्नौ प्रवेशो जन्मान्तरे सीतारूपेण तस्याः प्रादुर्भावश्च

अथ राजन् महाबाहुर्विचरन् पृथिवीतले।
हिमवद्वनमासाद्य परिचक्राम रावणः॥ **7.17.1** ॥

तत्रापश्यत् स वै कन्यां कृष्णाजिनजटाधराम्।
आर्षेण विधिना चैनां दीप्यन्तीं देवतामिव॥ **7.17.2** ॥

स दृष्ट्वा रूपसम्पन्नां कन्यां तां सुमहाव्रताम्।
काममोहपरीतात्मा पप्रच्छ प्रहसन्निव॥ **7.17.3** ॥

किमिदं वर्तसे भद्रे विरुद्धं यौवनस्य ते।
नहि युक्ता तवैतस्य रूपस्यैवं प्रतिक्रिया॥ **7.17.4** ॥

रूपं तेऽनुपमं भीरु कामोन्मादकरं नृणाम्।
न युक्तं तपसि स्थातुं निर्गतो ह्येष निर्णयः॥ **7.17.5** ॥

कस्यासि किमिदं भद्रे कश्च भर्ता वरानने।
येन सम्भुज्यसे भीरु स नरः पुण्यभाग् भुवि॥ **7.17.6** ॥

पृच्छतः शंस मे सर्वं कस्य हेतोः परिश्रमः।
एवमुक्ता तु सा कन्या रावणेन यशस्विनी॥ **7.17.7** ॥

अब्रवीद् विधिवत् कृत्वा तस्यातिथ्यं तपोधना।
कुशध्वजो नाम पिता ब्रह्मर्षिरमितप्रभः॥ **7.17.8** ॥

बृहस्पतिसुतः श्रीमान् बुद्ध्या तुल्यो बृहस्पतेः।
तस्याहं कुर्वतो नित्यं वेदाभ्यासं महात्मनः॥ **7.17.9** ॥

सम्भूता वाङ्मयी कन्या नाम्ना वेदवती स्मृता।
ततो देवाः सगन्धर्वा यक्षराक्षसपन्नगाः॥ **7.17.10** ॥

ते चापि गत्वा पितरं वरणं रोचयन्ति मे।
न च मां स पिता तेभ्यो दत्तवान् राक्षसेश्वर॥ **7.17.11** ॥

कारणं तद् वदिष्यामि निशामय महाभुज।
पितुस्तु मम जामाता विष्णुः किल सुरेश्वरः॥ **7.17.12** ॥

अभिप्रेतस्त्रिलोकेशस्तस्मान्नान्यस्य मे पिता।
दातुमिच्छति तस्मै तु तच्छ्रुत्वा बलदर्पितः॥ **7.17.13** ॥

शम्भुर्नाम ततो राजा दैत्यानां कुपितोऽभवत्।
तेन रात्रौ शयानो मे पिता पापेन हिंसितः॥ **7.17.14** ॥

ततो मे जननी दीना तच्छरीरं पितुर्मम।
परिष्वज्य महाभागा प्रविष्टा हव्यवाहनम्॥ **7.17.15** ॥

ततो मनोरथं सत्यं पितुर्नारायणं प्रति।
करोमीति तमेवाहं हृदयेन समुद्वहे॥ **7.17.16** ॥

इति प्रतिज्ञामारुह्य चरामि विपुलं तपः।
एतत् ते सर्वमाख्यातं मया राक्षसपुङ्गव॥ **7.17.17** ॥

नारायणो मम पतिर्न त्वन्यः पुरुषोत्तमात्।
आश्रये नियमं घोरं नारायणपरीप्सया॥ **7.17.18**॥

विज्ञातस्त्वं हि मे राजन् गच्छ पौलस्त्यनन्दन।
जानामि तपसा सर्वं त्रैलोक्ये यद्धि वर्तते॥ **7.17.19**॥

सोऽब्रवीद् रावणो भूयस्तां कन्यां सुमहाव्रताम्।
अवरुह्य विमानाग्रात् कन्दर्पशरपीडितः॥ **7.17.20**॥

अवलिप्तासि सुश्रोणि यस्यास्ते मतिरीदृशी।
वृद्धानां मृगशावाक्षि भ्राजते पुण्यसञ्चयः॥ **7.17.21**॥

त्वं सर्वगुणसम्पन्ना नार्हसे वक्तुमीदृशम्।
त्रैलोक्यसुन्दरी भीरु यौवनं तेऽतिवर्तते॥ **7.17.22**॥

अहं लङ्कापतिर्भद्रे दशग्रीव इति श्रुतः।
तस्य मे भव भार्या त्वं भुङ्क्ष्व भोगान् यथासुखम्॥ **7.17.23**॥

कश्च तावदसौ यं त्वं विष्णुरित्यभिभाषसे।
वीर्येण तपसा चैव भोगेन च बलेन च॥ **7.17.24**॥

स मया नो समो भद्रे यं त्वं कामयसेऽङ्गने।
इत्युक्तवति तस्मिंस्तु वेदवत्यथ साब्रवीत्॥ **7.17.25**॥

मा मैवमिति सा कन्या तमुवाच निशाचरम्।
त्रैलोक्याधिपतिं विष्णुं सर्वलोकनमस्कृतम्॥ **7.17.26**॥

त्वदृते राक्षसेन्द्रान्यः कोऽवमन्येत बुद्धिमान्।
एवमुक्तस्तया तत्र वेदवत्या निशाचरः॥ **7.17.27**॥

मूर्धजेषु तदा कन्यां कराग्रेण परामृशत्।
ततो वेदवती क्रुद्धा केशान् हस्तेन साच्छिनत्॥ **7.17.28**॥

असिर्भूत्वा करस्तस्याः केशांश्छिन्नांस्तदाकरोत्।
सा ज्वलन्तीव रोषेण दहन्तीव निशाचरम्॥ **7.17.29**॥

उवाचाग्निं समाधाय मरणाय कृतत्वरा।
धर्षितायास्त्वयानार्य न मे जीवितमिष्यते॥ **7.17.30**॥

रक्षस्तस्मात् प्रवेक्ष्यामि पश्यतस्ते हुताशनम्।
यस्मात् तु धर्षिता चाहं त्वया पापात्मना वने॥ **7.17.31**॥

तस्मात् तव वधार्थं हि समुत्पत्स्ये ह्यहं पुनः।
नहि शक्यः स्त्रिया हन्तुं पुरुषः पापनिश्चयः॥ **7.17.32**॥

शापे त्वयि मयोत्सृष्टे तपसश्च व्ययो भवेत्।
यदि त्वस्ति मया किञ्चित् कृतं दत्तं हुतं तथा॥ **7.17.33**॥

तस्मात् त्वयोनिजा साध्वी भवेयं धर्मिणः सुता।
एवमुक्त्वा प्रविष्टा सा ज्वलितं जातवेदसम्॥ **7.17.34**॥

पपात च दिवो दिव्या पुष्पवृष्टिः समन्ततः।
पुनरेव समुद्भूता पद्मे पद्मसमप्रभा॥ **7.17.35**॥

तस्मादपि पुनः प्राप्ता पूर्ववत् तेन रक्षसा।
कन्यां कमलगर्भाभां प्रगृह्य स्वगृहं ययौ॥ **7.17.36**॥

प्रगृह्य रावणस्त्वेतां दर्शयामास मन्त्रिणे।
लक्षणज्ञो निरीक्ष्यैव रावणं चैवमब्रवीत्॥ **7.17.37**॥

गृहस्थैषा हि सुश्रोणी त्वद्बधायैव दृश्यते।
एतच्छ्रुत्वार्णवे राम तां प्रचिक्षेप रावणः॥ **7.17.38** ॥

सा चैव क्षितिमासाद्य यज्ञायतनमध्यगा।
राज्ञो हलमुखोत्कृष्टा पुनरप्युत्थिता सती॥ **7.17.39** ॥

सैषा जनकराजस्य प्रसूता तनया प्रभो।
तव भार्या महाबाहो विष्णुस्त्वं हि सनातनः॥ **7.17.40** ॥

पूर्वं क्रोधहतः शत्रुर्ययासौ निहतस्तया।
उपाश्रयित्वा शैलाभस्तव वीर्यममानुषम्॥ **7.17.41** ॥

एवमेषा महाभागा मर्त्येषूत्पत्स्यते पुनः।
क्षेत्रे हलमुखोत्कृष्टे वेद्यामग्निशिखोपमा॥ **7.17.42** ॥

एषा वेदवती नाम पूर्वमासीत् कृते युगे।
त्रेतायुगमनुप्राप्य वधार्थं तस्य रक्षसः॥ **7.17.43** ॥

उत्पन्ना मैथिलकुले जनकस्य महात्मनः।
सीतोत्पन्ना तु सीतेति मानुषैः पुनरुच्यते॥ **7.17.44** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे सप्तदशः सर्गः॥